नं० ६१० - च

(धर्मशास्त्राम्) वापीकूपतडागादिप्रतिष्ठाविधिः

पत्राणि ४ (सम्पूर्णम्)

नं० ६१० - च

४ पत्र

अथ वापीकूपतडागादिप्रतिष्ठाविधिः। तत्र युगादिषु गांतविषुवायनादिपुण्यतिथौ प्रातः कृतनित्यक्रियो यजमानः सितवासाः जलाशय
समीपे स्वबाहुशमितहस्तमंडपं कारयेत् तन्मध्ये तिलघस्तचतुष्कमितां वेदीं च वेद्याश्च दक्षिणोत्तरप्रान्ते नेपलमरत्निखातं वि
तस्तिमात्रयोनिं कुंडं च कारयेत् ततश्च वेद्या उपरि प्रागादिदिक्षु गणेशादिदेवतानैकादशप्राप्तनाकाधार्याः ताश्च क्रमात् पीता १ रक्ता २
कृष्णा ३ नीला ४ सिता ५ कृष्णा ६ हरिता ७ शुक्ला ८ वेदिमध्ये शुक्ला ९ अनंतस्य रक्ता १० ब्रह्मणः ततोश्वत्थोदुंबरप्लक्षवटशाखा
भिराम्रपल्लवैश्च मंडपस्य प्रागादिद्वारेषु तोरणानि कुर्यात् ततो वरं उद्यमादाय ॐ मद्य कर्तव्यकूपादिजलाशयोत्सर्गकर्मणि अमु
कगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्पतांबूलवासोभिराचार्यत्वेन त्वामहं वृणे इति ब्राह्मणं वृणुयात् वृतोस्मीति प्रतिवचनं एवं क
कर्तव्यकूपोत्सर्गयज्ञांगभूतहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्म कर्तुममुकगोत्रं ब्रह्मत्वेन त्वामहं वृणे इति द्वितीयं
वृणुयात् एवं होतृत्वेन तृतीयं एवं ब्रातब्राह्मणानुपद्वारास्वस्त्ययनं वाचयित्वा कूपपार्श्वमनादिषु उपविश्य उपविष्टपकुशत्रयतिल
जलान्यादाय ॐ अद्य कूपजलाशयोत्सर्गयज्ञेनाहं यदृप्रतिसंकल्पतदंगत्वेन सूर्यादिग्रहलनवग्रहवरुणादिदेवतानां होमह
जपिष्ये इति संकल्पयेत् चित्राम्रपल्लवैं धारयेत् वेद्युत्तरतश्च सर्वोपकरणानि ततः आचार्यः पंचवर्णिकाचूर्णेन षोडशा
रं पद्ममालिख्य तत्रेन्द्रादिदिक्पालसूर्यादिनवग्रहब्रह्मादित्रयसरस्वतीलक्ष्मीपार्वतीगणेशस्कंदयमकालचित्रगुप्ता
ग्निजलपृथ्वीविष्णुप्राकृमत्स्यपतिसर्पविनायकदुर्गावाद्यक्षाकाशांश्विनीकुमारानक्षत्रैराशिवास्तुपापित्राप्रत्येकं चतुर्थ्यं

प्रतिष्ठापत्र ४ ८।९ मालादिनकृत ५ आतीगतविधिः ५ हलिकाप्रजन ६ कृतकर्मविचार ६

पदेशजयेत् तत्रक्रमः प्रथमं यजमानो हातानादाय मंडपमपप्रतिष्ठानं ॐ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं य
ज्ञं समिमं दधातु विश्वेदेवास इह मादयंतामों प्रतिष्ठ ॐ गणपति दुर्गा योग समाप्तिपर्यंत मत्राण छेनामिह द्वारि तिष्ठेनाभिन्या
वाह्य संस्थाप्य एषेर्घ्यो गणपति दुर्गाभ्यां नमः इत्येवमर्घ्यादिभिर्यथालब्धोपचारैर्द्वारपालनार्थं गणपति दुर्गे पूजयेत् त
तः पद्मदलेषु स्वस्वदिक्षु इंद्रादीन् तत्रमंत्राः एह्येहि सर्वामर सिद्धसाध्यैरभिष्टुतो वज्रधरामरेशः संवीज्यमानोऽप्सरं
सांगणेन रक्षाध्वरं नो भगवन्नमस्ते १ एह्येहि सर्वामरहव्यवाह मुनिप्रवीरैरभितोभिजुष्ट तेजोवता लोकगणेन सार्द्धम
माध्वरं रक्ष कवे नमस्ते २ एह्येहि वैवस्वत धर्मराज सर्वामरैरर्चित धर्ममूर्ते शुभाशुभानंद शुभासीनः शिवाय नः पाहि मखं
नमस्ते ३ एह्येहि रक्षोगणनायक त्वं विशालवेतालपिशाचसंघैः ममाध्वरं पाहि शुभाधिनाथ लोकेश्वर त्वं भगवन्नमस्ते
४ एह्येहि यादोगणवारिधीनां गणेन पर्जन्यमहाप्सरोभिः विद्याधरेंद्रामरगीयमान पाहि त्वमस्मान् भगवन्नमस्ते ५ ए
ह्येहि यज्ञे मम रक्षणाय मृगाधिरूढः सह सिद्धसंघैः प्राणाधिपः कालकवेः सहायो गृहाण पूजां भगवन्नमस्ते ६ एह्ये
हि यज्ञेश्वर यज्ञरक्षां विधत्स्व नक्षत्रगणेन सार्द्धं सर्वौषधीभिः पितृभिः सहैव गृहाण पूजां भगवन्नमस्ते ७ एह्येहि विश्वे
श्वर नस्त्रिशूलकपालखट्वांगधरेण सार्द्धं लोकेश भूतेश्वर यज्ञसिध्यै गृहाण पूजां भगवन्नमस्ते ८ एह्येहि पाताल
धरामरेशाः नागांगनाकिंन्नरगीयमान यक्षोरगेंद्रामरलोकसार्द्धं ममानंतरक्षाध्वरमस्मदीयं ९ एह्येहि विश्वाधिपते मुने

इ लोकेन सार्द्धं पितृदेवताभिः सर्वस्य धाता स्थपितप्रसादो रक्षाध्वरं नः सततं प्रियाय १० ततः सूर्यादीन् पूजयेत् तत्र मंत्राः आकृष्णेनेत्या
दिनवमंत्रैः सूर्यादीन् पूजयेत् ब्रह्मयज्ञानमिति मंत्रेण ब्रह्माणं पूजयेत् विष्णोरराटमसीति मंत्रेण विष्णुं पूजयेत् नमः शंभवाय इति शिवं
पूजयेत् पंचनद्यः इति मंत्रेण सरस्वतीमर्चयेत् श्रीश्च ते इति श्रियं पूजयेत् अंबे अंबिके इति दुर्गां पूजयेत् नमो गणेभ्यो गणेशं पूजयेत्
यमाय त्वा इति यमं पूजयेत् अग्निं दूतमिति अग्निं ओं कार्षिरसि समुद्रस्य त्वा इति जलं पूजयेत् मही द्यौः पृथिवी इति पृथिवीं पूजयेत् इदं
विष्णुर्विचक्रमे त्रे इति विष्णुं ओं महाँ इन्द्रो वज्रहस्तः षोडशी शर्म यच्छतु हंतु पाप्मानं योऽस्मान्द्वेष्टि यं च वयं द्विष्मः इति शक्रं पूजयेत् ओं नमोऽस्तु
सर्पेभ्यो इति सर्पान् सप्तऋषयः इति सप्तर्षीन् ध्रुवक्षितिमंत्रेण ध्रुवं पूजयेत् ईशानमपि स्वस्वमंत्रैः प्रणवादिनमोंतस्वस्वनामरूप
चतुर्थ्यंतैः सर्वानावाह्यार्चयेत् ततः त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च ब्रह्मविष्णुशिवैः सार्द्धं रक्षां कुर्वंतु तानि मे १ देव
दानवगंधर्वयक्षराक्षसपन्नगाः ऋषयो मनवो गावो देवमातर एव च २ इति मंत्राभ्यां भूतग्रा
मं हस्तमात्रवेदिकायां न्यस्यावाह्यार्चयेत् ततो वरुणपूजा ओं आयाहि भगवन् देव तोयपते जलेश्वर प्रांशुकुंदेंदुवर्णाभ मकरध्व
जपाशधृक् १ यज्ञभुक्सरितां नाथ सर्वपापप्रणाशन मयास्मिन्निर्मिते कूपे सान्निध्यमिह कल्पय २ अनेन वरुणमावाह्य स्थापयेत् ए
तानि पाद्यानि वरुणाय नमः एवं पंचोपचारैरर्चयेत् अलंकरणमपि दद्यात् कूपपश्चिमे यजमानशरीरसंमितां क्षीरवृक्षोपयष्टिं
मारोपयेत् तत्र ओं आब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी इति मंत्रेण तां यष्टिं पूजयेत् ततः ऐशान्यां यूपमास्थाप्य पंचोपचारैः पूजयेत् ततः
अनंतो वासुकिश्चैव कर्कोटस्तक्षकस्तथा नागः शंखो महापद्मः शेषः कुलिक एव च १ इत्येते वाष्टकुले नागा ये च नागा विषायुधाः

तान्सृजपाम्यहं नन्नया रक्षां कुर्वीह तु मे सदा २ अनिनागान् सृजपेत् गंधादिभिरभ्यर्च्य कूपे पंचगव्यं क्षिप्त्वा सृजपेत् आवाहनादिषोडशोप
चारैरर्चयेत् वस्त्रेणाच्छादयेत् ततः कूपादितो भडधत्यतर्पयेत्पितृ देवताः। अद्येतज्जलमुत्सृष्टं मयावै धर्मचेतसा तेवैतत्त्रि
2 समाप्यंतु येच मे जलकांक्षिणः १ यक्षगंधर्वपतयो भूताम्बरविहंगमाः ग्रहनक्षत्रवेतालाः पिशाचाः प्रेतदानवाः २ कूष्मांडाः राक्ष
साश्चैव क्षेत्रपाला विहंगकाः गिरिकंधरदुर्गेषु वनेषु निचसंतिये अनाथाश्चसनाथाश्च येनितं जलकांक्षिणः समाप्यंतिदमेते
षामिदमत्र जलं मया ४ ततः कुशतिलजलान्यादाय अद्यामुकमासीयामुकपक्षीयामुकतिथौ शाकलपापक्षयपूर्वकजलाशयाव
स्थितजलबिंदुसमसंख्यावर्षशतावच्छिन्नरुद्रालयमहितत्वानेककल्पावच्छिन्नस्वर्गलोकहर्षपरार्द्धद्वयावच्छिन्नमहत्तपः प्राप्ति
तदूर्ध्वपर्ययानंतरं धनधकीर्णद्विजकुलोत्पतिपुत्रपौत्रादिधनधान्यसमृद्धिमत्वेत्रतेदशपूर्वेदशापरपितृपक्षीयत्रिपूर्वअव
रमातृपक्षीयपुरुषतारणपूर्वकसुरांगनारम्यमाणहंससहितविमानाधिकरणकपरमविष्णुपदप्राप्तिकामो जलाशयं वरुणदेवता
कं वस्त्रघटादितसर्वभूतोपयोगित्वेनाहं समुत्सृजेत् ततो ब्राह्मणकेनैतज्जलाशयोत्सर्गयज्ञप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतं
यथानामगोत्रायेति दद्यात् ततो मंडपमागत्य सामान्यं सर्वभूतानां मया दत्तमिदं जलं रमंतु सर्वभूतानि स्नानपानावगाहनैः
सर्वभूतेभ्य उत्सृष्टं मयैतज्जलमूर्जितं रमंतु सर्वभूतानि स्नानपानावगाहनैरिति पठेत् अत्र सामान्यपदे यथा मम तथान्येषा
मपीत्यर्थः ततः आचार्यः कांस्यपात्रेणाग्निमानीय कुंडे स्थापयेत् प्रथमपंचभूसंस्कारं कुर्यात् ततो वरुणाग्नेः प्रदक्षिणाक्
मेणानीय अग्नेर्दक्षिणतो दक्षमुद्रासनो [illegible] कुशोपरिस्तरणं भूमिमपाश्य प्रणीतापात्रं 2

पुरतः कृत्वा जलेनार्द्रकुशैस्तथा द्वय स्रुवमुखमवलोक्य पूर्वास्ततोऽन्तराग्रकुशाच्चयोपरि निदध्यात् ततो बर्हिषश्चतुर्थभागमा
ग्नेयादीशान्यान्तं ब्रह्मणोऽग्निपर्यन्तं नैऋत्याद्वायव्यान्तं अग्नितः प्रणीतापर्यन्तं परिस्तीर्याग्नेरुत्तरतोऽर्थवदासनं तत्र क्रमः पवि
त्रच्छेदनार्थं कुशत्रयं पवित्रकरणार्थं साग्रमनन्तर्गर्भं कुशपत्रद्वयं प्रोक्षणीपात्रमाज्यस्थाली संमार्जनकुशाः उपयमनार्थं
वेणीरूपकुशत्रयं एवं आज्यं होतव्यं प्रादेशमिति समित्त्रयं ब्रह्मणो दक्षिणोऽर्घ्यपूर्णपात्रं ततः आज्यस्थाल्यामाज्यनिर्वापः पवि
त्रच्छेदनकुशैः पवित्रे छित्वा प्रोक्षणीपात्रे सपवित्रकरेणाद्भिः प्रणीताजलं निधाय व्यस्तहस्तधृतपवित्राभ्यां प्रोक्षण्युत्पव
नं ततोऽनामिकाङ्गुष्ठाभ्यां मूले धृतपवित्राभ्यां प्रोक्षिण्याः पात्रस्योद्दिङ्गनं ततः पवित्रे प्रोक्षणीपात्रे निधाय संमार्जनकुशैः एवं संमा
र्ज्य जलेनाभिषिच्य प्रतप्य पुनरभिषिच्य पुनः प्रतप्य स्रुवं दक्षिणतो निदध्यात् ततोऽग्नेः पूर्वदक्षिणाक्रमेणाज्यमवतार्य सत्प
पद्व्येन तन्निरस्य प्रोक्षणीवदुत्पूय समिधमादाय घृतेनाभिषिच्य ओं प्रजापतिं मनसा ध्यात्वा किंचिदुत्तिष्ठन्नग्नौ निक्षिपेत् । त
तः पवित्रहस्तेन प्रोक्षणीजलेनाग्निमैशानीतः तदन्तं प्रदक्षिणाक्रमेण पर्युक्ष्य तत्र पवित्रे निधायाघाराज्याहुतीर्जुहुयात् त
त्र क्रमः ओं प्रजापतये स्वाहा इदं प्रजापतये इति मनसा ओं इन्द्राय स्वाहा इदमिन्द्राय ओं अग्नये स्वाहा इदमग्नये ओं सोमा
य स्वाहा इदं सोमाय ओं भूः स्वाहा इदं भूः ओं भुवः स्वाहा इदं भुवः स्वः स्वाहा इदं स्वः ओं भूर्भुवः स्वः स्वाहा इदं भूर्भु
वः स्वः ओं त्वन्नो अग्ने इदमग्नीवरुणाभ्यां ओं स त्वन्नो अग्ने इदमग्नीवरुणाभ्यां ओं अयाश्चाग्ने इदमग्नये
ओं ये ते शतं वरुण इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः ओं उदुत्तमं वरुणपाशम् इदं वरु

णायादितये ॐप्रजापतयेस्वाहा इदंप्रजापतये इतिमनसा ॐअग्नयेस्विष्टकृतेस्वाहा इदमग्नयेस्विष्टकृते ॐगणानांत्वा इदंग
णपतये एवंस्वाहांततनंब्रह्मदाहुतयः ॐब्रह्मयज्ञानं इदंब्रह्मणे ॐविष्णोरराटमसि इदंविष्णवे ॐनमःशम्भवायच इ
3 दंशंभवे ॐश्रीश्चतेलक्ष्मीश्च० इदंश्रियै ॐपंचनद्यः इदंसरस्वत्यै ॐआकृष्णेन० इदंसूर्याय ॐइमंदेवा० इदंचंद्रमसे
ॐअग्निर्मूर्द्धा० इदंभौमाय ॐउद्बुध्यस्वाग्ने० इदंबुधाय ॐबृहस्पतेअति० इदंबृहस्पतये ॐअन्नात्परिस्रुतो० इदंशु
क्राय ॐशन्नोदेवी० इदंशनये ॐकयानश्चित्र० इदंराहवे० ॐकेतुंकृण्वन्नकेतवे० इदंकेतवे ॐअग्निंदूतं इदमग्नये
ॐदेवीरापो० इदमद्भ्यः ॐस्योनापृथिवी० इदंपृथिव्यै ॐमहांइंद्रोवज्रहस्तः इदमिंद्राय ॐयदक्रंदः प्रथमंजायमानउद्यंस
मुद्रादुतवापुरीषात् स्येनस्यपक्षाहरिणस्यबाहूउपस्तुत्यम्महिजातंतेअर्वन्स्वाहा इदंसमुद्रेभ्यः ॐविष्णोरराट० इदंविष्णवे० ॐ
आब्रह्मन्ब्राह्मणो० इदंब्रह्मणे ॐसयोइद्रः सगणोमरुद्भिः सोमंपिबवृत्रहाशूरविद्वान्जहिशत्रूंरपमृधोनुदस्वाथाभ
यंकृणुहिविश्वतोनः स्वाहा इदमिंद्राय ॐयमायस्वाहा इदंयमाय ॐकार्षिरसि० इतिकालाय इत्यधिदेवता इदंविष्णु
विक्रममेवे० इदंविष्णवे ॐइंद्रआसांनेता० इदमिंद्राय ॐप्रजापतयेनमः ॐनमोस्तुसर्पेभ्यो० इदंसर्पेभ्यः ॐब्रह्मा
णोनेमतयः सचंहिता सःसुष्मइयर्तिग्रमतोमेअद्भिः आसासतेप्रतिहर्यंत्युकथेमहरीवहंतोनोअधस्वाहा इदंब्रह्मणे
इतिप्रत्याधिदेवता ॐत्रातारमिंद्र० स्वाहा इदमिंद्राय ॐअग्निंदूतं इदमग्नये ॐयमायस्वाहा० इदंयमाय ॐनमस्ते ३
ते० इदंनिऋतये ॐइमंमेवरुणश्रुधी० इदंवरुणाय ॐवातोवामनोवा० इदंवायवे ॐकुविदंगयवमंतो० इदंसोमा

प ॐ तन्नीशानं० ईशानाय ॐ ऊर्ध्व उपगोऽनये० इदं मूर्ध्नाय ॐ मही द्यौः इदं पृथिव्यै ॐ प्राच्यै स्वाहा आग्नेय्यै याम्यायै
नैरीच्यै नैरृत्यै वायव्यै उदीच्यै ईशान्यै अंतरिक्षायै रसातलायै स्वाहा इति होमं कृत्वा पश्चाद्बलिदानं होमश्च बलि
दानञ्च मंडलार्चनमतः परं वेदपाठश्च हस्तो च द्विजानां तर्पणं तथा पूर्णाहुत्याभिषेकाश्च ततो यज्ञपरिक्रमा १ तत्र शाकशेटु
सौम्य जातवेदसादि सूक्तानि होमपर्यंत पठनीयानि ततो गजाश्वरथ्यवल्मीकनदीसंगमह्रदगोष्ठस्थानेभ्यो मृदमानीय तां
गोरोचनसिद्धार्थचंदनगुग्गुलानि कुंभे निक्षिप्य यजमानं तज्जलेनाभिषिंचेत् ॐ आपो हि ष्ठेत्यादि ॐ सुरास्त्वामभिषिंचंतु ब्र
ह्माविष्णुमहेश्वराः वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः १ प्रद्युम्नश्चानिरुद्धश्च भवंतु विजयाय ते आखंडलोग्नि
र्भगवान्यमो वै नैरृतिस्तथा २ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ब्रह्मणा सहिताः सर्वे दिक्पालाः पांतु ते
सदा ३ आदित्यादिग्रहाः सर्वे रुद्रादित्य [illegible] रोगताः रुद्रादयो देवगणाः मंत्राः स्वाहादयस्तथा ४ नारदाद्यादिविगणागाय
त्र्याद्याश्च मातरः अदितिपर्वतु मासाश्च सप्तद्वीपा वसुंधरा ५ एते त्वामभिषिंचंतु सर्वकामार्थसिद्धये कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टि
श्रद्धा क्रिया मति बुद्धिर्लज्जा वपुः शांतिस्तुष्टिः कांतिश्च मातरः एते त्वामभिषिंचंतु सर्वकामार्थसिद्धये देवपत्न्यो नुमा नागा दै
त्याश्चाप्सरसंगताः अस्त्राणि सर्वशास्त्राणि राजानो वाहनानि च एते त्वामभिषिंचंतु सर्वकामार्थसिद्धये एवमभिषिंच्य ब्राह्म
णेभ्य आचार्याय ऋत्विग्भ्यो दक्षिणादानं गोश्च दद्यात् शतं वा पंचाशत् वा पंचविंशतिं दश एकां वा यथाशक्ति एकं वा व्
ततः शय्यादानं ततः सर्वरत्नसमन्वितं स्वर्णपात्रां गंगाजलेन [illegible] निक्षिप्य तस्मिन् जले मकरादीन् निक्षिप्य दध्यक्षतैः संपूज्य

चतुर्भिः ब्राह्मणैः सहितस्त्रिमुखी ... कुर्यात् ततो मंडपमागत्य वर्हिं कृत्वा घृतेनाभिघार्य ॐ देवा गातुविदो गा
तुं वित्वा गातुमित मनसस्पत इमं देव यज्ञं स्वाहा वाते धाः स्वाहा इति पूर्णाहुतिं कुर्यात् ततो यांतु देवगणाः सर्वे पूजामादाय मा
मकीं इष्टकामसमृद्ध्यर्थं पुनरागमनाय च १ इति पुष्पान्दत्वा तेनैव वह्निं विसृज्य सहस्रमारभ्य शतावरं ब्राह्मणान् भोजयेत् दक्षिणां
दद्यात् भूयसीं च दद्यात् ततः स्वयं सपरिवारो भुंजीत इति कूपप्रतिष्ठा समाप्ता ॥ अथ सामग्री रोली मोली केशर चं
दन अक्षत चावल पतासे पुष्प धूप दीप तांबूल पुंगीफल ११ नारियल ४ चंदोवा उंवरप्लक्षाश्वत्थानां शाखा
एषामेव पत्राणि आम्रपल्लवा पताका १० हस्तप्रमाणा वितस्तिविस्तृता एका ध्वजपताका पंचहस्ता दीर्घेण विस्तारेण
द्विहस्तप्रमाणा वितस्तिविस्तृता स... ध्वज ... घुंघरू ११ वस्त्र गज २ कांस्यपात्र २ ... पात्र १ ... पात्र १ ...
पात्र १ सुवर्णमाषा १ धोतीयां २ ... २ चावल २५ धमुठी दुकड़ियां कलश ५ कुशा तिल यव गोमय पत्नाफ्रास
मिधः ... व्यंजन उपानह गावः १०० वा ५० वा २५ वा १० वा १ धोती अंगोछा संग ... तांम्रपट्टि कांस्यदोहनी
ब्राह्मणभोजन दक्षिणा स्वर्णकूर्मं मकरो राजतमत्स्य डुडुभो ताम्रकुलीर २ मंडुको लोहशिशुमारः स्वर्णपात्री गजा
रथ्यवल्मीकनदीसंगमगोष्ठचत्वरेति सप्तमृत्तिका ... सहस्रयष्टी १ दधि ... गुग्गुल ... १००००० इति सामग्री